Prantik Gabeshana Patrika ISSN 2583-6706 (Online)
Multidisciplinary-Multilingual- Peer Reviewed-Bi-Annual
Digital Research Journal
Website : santiniketansahityapath.org.in
Volume-4 Issue-1 July 2025

# कुन्दमालानाटके प्रतिफलिता भारतीयसंस्कृतिः

पिंकी दास

Link : https://santiniketansahityapath.org.in/wp-content/uploads/2025/07/2_Pinki-Das.pdf

**सारांशः** भारतीयसंस्कृतेः मूलतत्त्वं संस्कृतशास्त्रे काव्ये च अन्तर्निहितमस्ति। क्षुद्रवीजस्य प्रतिविम्बनं यथा पतिणतमहीरुहः तथैव भारतीयसंस्कृतेः प्रतिविम्बनं संस्कृतसाहित्यं शास्त्रं च। भारतीयसंस्कृतेः परम्परायाः एकमुज्ज्वलमुदाहरणं कुन्दमालानाटकम्। दिङ्नागस्य नाट्यमिदं षष्ठाङ्कसमन्वितम्। अस्मिन् नाटके सर्वत्रैव देवपरका भारतीया संस्कृतिः प्रतिफलिताऽस्ति। देवस्तुत्यात्मकमङ्गलश्लोकेन नाट्यस्य शुभारम्भः, सन्ध्यावन्दनं, यज्ञ-हवनकार्यं, सूर्योपासनं, प्रकृति-मानवयोः गूढबन्धनं, कुन्दमाल्योपहारेण गङ्गापूजनं, गोभ्यः ब्राह्मणेभ्यश्च स्वस्तिवाचनं, रामायणगीतं, वेदस्तवनं, इत्यादिभिः विविधैः वर्णनैः विरचितं कुन्दमालानाटकं भारतीयसंस्कृतेः मूलाधारस्वरूपम्। पुरुषार्थप्रदायिनी एषा भारतीयसंस्कृतिः अस्माकं मानवजीवने मार्गप्रदर्शका भवतु इति मत्वा शोधपत्रमिदं विशदरूपेण अत्र प्रस्तूयते।

**कूटशब्दाः** भारतीयसंस्कृतिः, कुन्दमालानाटकं, सन्ध्यावन्दनं, गङ्गापूजनं, रामायणगीतं, वेदस्तवनम् इति।

**सं**स्कृतिस्तु मानव-सत्त्व-विकासस्य सा प्रक्रिया भवति यया कश्चिज्जनः स्वकीयं जीवनोद्देश्यमधिगच्छति। जीवनोद्देश्यं नाम भारते चतुर्वर्गप्राप्तिरेव। धर्मार्थकामादीनां सेवनेन सह परमं पदं प्रापयति भारतीया संस्कृतिः। तदधिकृत्य कालिदासेनादर्शभूतानां रघुवंशनृपाणां जीवनविधिं वर्णयन् आह –

“शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।
वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्।।”[1]

अत्रास्मिन् श्लोके सत्त्व-विकासस्य सोपानपरम्परा सम्यङ् निदर्शिता। संस्कृतेन संस्कृतिः अभ्युदिता जाता। भारतीयसंस्कृतेः मूलसोपानं संस्कृतकाव्यं शास्त्रं च इति। भारतीयसंस्कृतेः प्रथमं वैशिष्ट्यं तस्या देवपरायणता विद्यते। तथाहि भारतीयप्रगमनस्य प्रायः सर्वाणि क्षेत्राणि देवपराणि सन्ति। एकस्मात् पुरुषाद् ब्रह्मणो वा जगतः सृष्टिं मत्वा दार्शनिकपद्धत्या तद् ब्रह्मणमभिज्ञाय मानवजीवनस्य सर्वोच्चमुद्देश्यं मुक्तिरिति सम्भावितम्। वैदिकदर्शनानुसारेण तदेकमेव ब्रह्म जगत्यस्मिन्नग्नीन्द्र-विष्णु-वरुण-रुद्रादिरूपेण सर्वत्र व्याप्तम्। एतेषां देवानां यज्ञादिभिः प्रसादनेन स्वर्गप्राप्तिरिति भारतीयधर्मस्य प्रमुखा प्रवृत्तिः।

भारतीयाः प्रवृत्तयः सामान्यतो देवपराः एव। भारतास्तु देववाणीमब्रुवन्। तेभ्यो वेदानां साहित्यिकनिधिरपि देवेभ्यः प्राप्तः। ते सत्कर्मसु व्यापृता अभूवन्, यतो देवाः सत्कर्मभिः प्रसन्ना भवन्ति। असत्कर्मभ्यस्ते भीता आसन्, यतः पापकारिणो जनान् देवा दण्डयन्ति। गीतानुसारेण,

“यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्।।”[2]

तस्मै भगवते सर्वं वस्तुजातं समर्पणीयं, न हि किञ्चित् स्वकीयमस्तीति।

प्राचीनयुगे ब्रह्मचारिणो ब्रह्मज्ञानेन ब्रह्मसंस्था भवितुं ब्रह्मचर्यमचरन्। गृहस्था ब्रह्मयज्ञेन शिष्येभ्यो ब्रह्मज्ञानं वितरन्ति स्म, देवपितृयज्ञयोर्देवार्चनं तर्पणञ्च कृतवन्तः, भूतयज्ञे सर्वेषां प्राणिनां दिव्यस्वरूपं हृदि धारयन्तस्तेभ्यो भोजनमर्पितवन्तः, अतिथियज्ञे च विष्णुरूपमेवातिथिं सम्मान्य तं सत्कृतवन्तश्च। वानप्रस्था मुनयस्तपसा तत्त्वज्ञानेन ब्रह्मविद्यारहस्यं ज्ञातुमयतन्त। संन्यासिनस्तु योगैर्ब्रह्मसंस्था एवाध्यात्मिकमानन्दमन्वभवन्।

पुरा भारतीयानां शिल्पकलासाहित्यादिप्रवृत्तयः सामान्यतया देवपरा आसन् इति कलाकृतीनां पर्यालोचनेन निःसन्दिग्धमेव तेषाम्। भारतस्येमामेव देवपरायणतामाश्रित्य राष्ट्रस्य सांस्कृतिकमैक्यं सुप्रतिष्ठितम्, 'वसुधैव कुटुम्बकमिति' भावना प्रादुर्भूता च।

भारतीयसंस्कृतौ धर्म-पदस्य अतिव्यापकविवृतिर्वर्तते। जीवनस्य प्रथम श्वासतोऽन्तिमश्वासपर्यन्तं प्रतिक्षणं मानवेन कथं व्यवहर्तव्यमिति धर्मो बोधयति। स धर्मः सांस्कृतिकोत्तराधिकाररूपो निधिर्भवति। भारतीयेषु धर्मग्रन्थेषु निदर्शितं यन्मानवः संस्कारैः स्वयोग्यतां कथं वर्धयेत्, चतुराश्रमेषु स्वोत्कर्षं कथं भवेत्, चतुर्वर्णका जनाः सामाजिकव्यवस्थायां कथं व्यवहरेयुः, सत्त्वविकासाय कीदृशं भोजनपेयादिकमुपयुज्येत, कथं शरीरं शुद्ध्यते, कीदृशो गृहे, ग्रामे, प्रदेशे वा निवसेत्, को व्यापारः सेवनीयः, के मनोरञ्जनविधयः परित्याज्याः, स्वकुटुम्वे समाजे च नागरिकः परस्परं कथं व्यवहरेदिति एते विषया धर्मग्रन्थेषु निदर्शिताः। एतदतिरिक्ता देवसम्बद्धाः कर्मकाण्डविषयका आचाराख्यापका स्वर्ग-नरक-निरूपकाः सिद्धान्तास्तु धर्मग्रन्थेषु प्राप्यन्त एव। ईदृशी धर्मपरता भारतीयसंस्कृतेरनुपमविशेषता।

भारतीयसंस्कृतेः दार्शनिकधारा वैदिकसाहित्ये रामायण-महाभारत-भगवद्गीतादिग्रन्थेषु नाट्य-काव्यसाहित्यशास्त्रेषु च प्रचरति। एतत् सर्वं खलु भारतीयसंस्कृतेर्महाकोषः। वेद-वेदान्त-स्मृति-पुराण-रामायण-महाभारत-महाकाव्य-नाट्यादयः प्राचीनग्रन्थाः अस्माकं भारतीयानां जीवनमार्गे पाथेयस्वरूपाः, यान् व्यतिरिच्य अस्माकं जीवनपद्धतिः भित्तिहीना भविष्यति। मानवजीवनस्यावसानं भवति, न तु ग्रन्थस्य। ग्रन्थाः दर्पणतुल्याः, यत्र जीवनस्य प्रतिविम्बनं सदैव दृश्यते। जन्मजन्मानातरेण एते ग्रन्थाः मानवानां जीवनमार्गं परिष्कृत्य जीवनसागरे अवगाहनस्य शिक्षणं ददति। श्रवणापेक्षया दर्शनमेव आत्मपरितृप्तेश्च मूलकारणम्। यतः नाट्यम् अभिनययोग्यम्। नाट्यसाहित्येन जीवनस्य प्रतिफलनं सुष्ठुतया अवगम्यते, यतः एतद्दर्शनसापेक्षम्।[3] अतः संस्कृतनाट्यसाहित्यं भारतीयसंस्कृतेः भावधारायाः आदर्शतायाश्च मूलाधारस्वरूपम्। कुन्दमालानाटकं रामायणमवलम्ब्य विरचितम्। तत्र न केवलं रसिकानां रसतृष्णायाः परितृप्तिः वर्तते अपि तु सतां सन्तर्पणाय अजस्रधाराऽपि तत्र प्रवाहिता वर्त्तते। तस्याः धारायाः बिन्दुमात्रस्पर्शः वर्तमानसमाजस्य कृते उपपयोगार्हो भवति। अस्मिन् नाटके भारतीयसंस्कृतेः सभ्यतायाः यः परिचयः प्राप्यते, तस्याः सुष्ठुतया संरक्षणं प्रतिपालनं च अस्माकम् अवश्यमेव कर्तव्यम् इति मत्वा तदाधारीकृत्य शोधपत्रमिदं प्रस्तुतीक्रियते।

कुन्दमाला हि रामायणस्योत्तरकाण्डगतां सीतापरित्यागकथामाधारीकृत्य प्रणीताऽस्ति। अत्र सन्ति षडेवाङ्काः। शारदातनयेन भावप्रकाशे उक्तम् – "कुन्दमालाऽत्र सुश्लिष्टा सन्धिपञ्चकसंयुता"[4] (द्रष्टव्य- प्राक्कथन-कुन्दमाला जयचन्द्रशास्त्री) परम्परानुसारमेव नाटकमिति सुखान्तमेव सीतारामयोः पुनः संश्लेषेण। वाल्मीकेराश्रमसमीपे गोमत्यां[5] वहन्तीं कुन्दपुष्पमालां वीक्ष्य रामस्तद्ग्रथनकौशलं सीताया एवेति समभिज्ञाय तद्द्वारेण सीतामनुगच्छतीति कथामूलमस्य कुन्दमालेति नामकरणम्। मुख्योऽत्र करुणो रसः।

नाटकमिदं गणेशस्तुतितः प्रारभ्यते, सूत्रधारः स्तौति शम्भुम्। यथा नाटकस्य प्रथमेऽङ्के –

"जम्भारिमौलिमन्दारमालिकामधुचुम्बिनः।
पिबेयुरन्तरायाब्धिं हेरम्बपदपांसवः।।"[6]

सूत्रधारः

"ज्वालेवोर्ध्वविसर्पिणी परिणतस्यान्तस्तपस्तेजसो
गङ्गातोयतरङ्गसर्पवसतिर्वल्मीकलक्ष्मीरिव।
सन्ध्येवार्द्रमृणालकोमलतनोरिन्दोः सदास्थायिनी
पायाद्वस्तरुणारुणांशुकपिला शम्भोर्जटासन्ततिः।।"[7]

अतः नाटकस्यादौ गणेश-शिवजटासन्ततिवन्दनं विहितम्। कार्यारम्भस्य पूर्वं मङ्गलाचरणोच्चारणं भारतीयसंस्कृतेः एकम् ऐतिह्यम्। इष्टदेवानां स्मरणेन भारतीयकाव्यं पल्लवितं निर्विघ्ने परिसमाप्तं च भवति। अतः मङ्गलाचरणम् आचरणीयम्। यदुक्तं तर्कदीपिकायाम् अन्नंभट्टेन — "मङ्गलस्य कर्त्तव्यत्वे शिष्टाचारानुमित-श्रुतेः एव प्रमाणत्वात्। समाप्तिकामो मङ्गलमाचरेत् इति श्रुतेः। तथाहि – मङ्गलं वेद-वोधित-कर्त्तव्यताकम् अलौकिक-अविगीत-शिष्टाचारविषयत्वात् दर्शादिवत्।"[8] कुन्दमालायां प्रथमे एव श्लोके श्रीगणेशस्य वर्णनं विधाय भारतस्य देवपरकां संस्कृतिं तथा मङ्गलस्य कर्तव्यताविधिं प्रतिष्ठापयति महाकविः दिङ्नागः, यः भारतीयसंस्कृतेः परम्परायाश्च स्मारकः।

**सीताचरित्रे प्रतिफलिता भारतीयसंस्कृतिः**

जनन्याः करस्पर्शेन यथा सन्तानस्य आह्लादं जायते तथैव जननीस्वरूपायाः भागीरथ्याः शीतलतरङ्गस्पर्शेन सीतादेवी प्रफुल्लिता जाता। भागीरथीनदी मातृरूपेण अत्र पूजिता। भागीरथीं प्रति भक्तिभावनाऽऽविष्कृता जाता। नदीजलस्पर्शे पापस्य क्षयो भवति इत्यपि अत्र सीतादेव्याः वचने सुस्पष्टं जायते – "साम्प्रतं जननीकरस्पर्शसुखशीतलस्य भागीरथीतरङ्गमारुतस्य स्पर्शेन परिश्रमस्येव पापस्य परिक्षयो जातः। तथापि दोहदकौतूहलं गङ्गावगाहने मां समुत्साहयति।[9] जननीरूपेण नदीं प्रति एतादृशी भक्तिभावना, शीतलतरङ्गस्पर्शेन पापनाशेन आत्मशुद्धेर्धारणा तथा गङ्गास्नानेन दोहदकालीना-इच्छापूर्तेः रीतिः सर्वाः भारतीयसंस्कृतेः दृष्टान्तस्वरूपाः।

रामाज्ञया वने परित्यज्यां सीतादेवीं यदा लक्ष्मणः पृच्छति- रामचन्द्रस्य कृते कः तव प्रतिसन्देशः? तदा सीतादेवी रामचन्द्राय ज्ञापनार्थं प्रत्युत्तरं ददाति- "मन्दभागिनीमनुशोचन् वर्णाश्रमपरिपालनमभिघ्नन्नात्मानं न बाधय। सद्धर्मे स्वशरीरे सावधानो भवेति।"[10] यतः वर्णाश्रमपरिपालनं राजधर्मः। वर्णाश्रमधर्माचरणं राज्ञां कर्तव्यम्। करणीयकर्म समाचरेदिति शास्त्रेष्वपि उपदिष्टमस्ति। यदुच्यते तैत्तिरीयोपनिषदि – "सत्यं वद। धर्मं चर।... धर्मान्न प्रमदितव्यम्।।"[11] अत्रैव नाटके अस्याः भारतीयपरम्मरायाः दृष्टान्तः वर्तते।

सीतायाः संसारधर्मचिन्तनेऽपि गुरुजनस्य कृते भक्तिभावं समादरं च प्रकटितं भवति। सीतायाः एतादृशः वधूधर्मः भारतीयसंस्कृतेः परिचायकः। यथा उच्यते लक्ष्मणं प्रति — "वत्स लक्ष्मण! प्रणमितव्या त्वया मम वचनात् राघवकुलराजधानी भगवत्ययोध्या। शुश्रूषितव्यः प्रतिमागतो महाराजः। साधयितव्या श्वश्रूणामाज्ञप्तिः।"[12]

अरण्ये लक्ष्मणवचने एतद् उच्यते – शून्यवनमपि सीतादेव्याः परिजनतुल्यम्। अरण्ये नदी-पक्षी-पादपच्छाया सीतया सह परिवारस्य सदस्यरूपेण आचरन्ति। यथा —

तरङ्गा वीजन्ते सजलकणिकान् शीतमरुत-
स्तथैते सङ्गीतं दधति कलहंसाः कलगिरः।
सखीव च्छायेयं रमयति परिष्वज्य हृदयं
वने शून्येऽप्यस्मिन् परिजनवतीवाऽत्रभवती।।[13]

तदा सीतया अपि उच्यते — स्वजनमध्यगताया इवात्राभिरमते मे हृदयम्[14]

रामेण परित्यक्तायाः सीतादेव्याः करुणावस्थां पश्य अरण्यस्थिताः जन्तवोऽपि शोकाकूलाः जाताः। अत्र मानव-प्रकृतयोः निविड़वन्धनं संसूच्यते। यथा –

"एते रुदन्ति हरिणा हरितं विमुच्य
हंसाश्च शोकविधुराः करुणं रुदन्ति।
नृत्यं त्यजन्ति शिखिनोऽपि विलोक्य देवीं
निर्यग्गता वरममी न परं मनुष्यः।।"[15]

प्रकृति-मानवयोः निगूढवन्धनं भारतीयऐतिह्यपरम्परायां सर्वत्रैव परिदृश्यते। अस्माकं प्राचीनसंस्कृतसाहित्ये प्रकृतेः एकम् उल्लेखयोग्यं स्थानं वर्तते। संस्कृतसाहित्यस्य कविभिः तेषां रचनायां प्रकृतेः वर्णना सज्जीकृता वर्तते। आङ्गलोसाहित्ये प्रकृतेः कविः न तु विरलः, परन्तु यया दृष्ट्या भारतीय-कवयः प्रकृतिम् अपश्यन्, आङ्गलोसाहित्यस्य प्रखातानां कवीनां परिप्रेक्षणं स्वतन्त्रम्। वर्डसवर्थ, शेली – कीट्स् प्रभृतिभिः कविभिः उच्चनैतिकादर्शरूपेण, वस्तुनिरपेक्षादर्शवादरूपेण, सौन्दर्यसम्भोगस्य प्रेरणारूपेण च स्वस्वदृष्ट्या प्रकृतेरनुसन्धानं कृतम्। परन्तु भारतीय-कवीनां समीपं प्रकृतिः एका पृथक्सत्तास्वरूपा, या मानवानां दैनन्दिनजीवने क्षुद्रवृहत्घटनया सह एकान्तरूपेण संश्लिष्टा। प्रकृत्या सह मानवजीवनस्य विचित्रां घटनां भावप्रकाशं च उन्मोच्य परिलक्षणं भारतीय-कविचित्तानाम् एव एकः धर्मः। प्रकृतिचित्रणे मर्मस्पर्शने दिङ्नागः सिद्धहस्तः। प्रकृति-मानवयोः निविडवन्धनं प्राणवन्तं कृत्वा महाकविभिः स्वस्वनाट्ये-काव्ये उपस्थापितम्। प्रकृतेः सजीवं चित्रणं यथा कालिदासस्य काव्ये दृश्यते, तथा दिङ्नागस्य नाट्येऽपि। यथा निम्नाङ्कितपद्यद्वये –

"नृत्यं मयूराः कुसुमानि वृक्षाः दर्भानुपात्तान् विजहुर्हरिण्यः।
तस्याः प्रपन्ने समदुःखभावमत्यन्तमासीद्रुदितं वनेऽपि।।"[16]

"एते रुदन्ति हरिणा हरितं विमुच्य
हंसाश्च शोकविधुराः करुणं रुदन्ति।
नृत्तं त्यजन्ति शिखिनोऽपि विलोक्य देवीं
तिर्यग्गता वरममी न परं मनुष्यः"।।[17]

अतः दिङ्नागस्य कुन्दमाला सजीवा जीवनस्फूर्तिमूर्त्तीरूपा च कृतिः। प्रकृति-मानवयोः महिमान्वित-भावादर्शः अस्मिन् नाटके सर्वत्रैव वरिवर्ति।

सुष्ठुगर्भनिर्वर्तनाय सीतया कुन्दमालोपहारसंकल्पेन गङ्गाऽभ्यर्थनं कृतम्। विविधधार्मिककृत्यानुष्ठानस्य वर्णनम् अत्र दृश्यते। प्रतिदिनं स्वहस्तग्रथिता कुन्दमाला समर्पणेन सीतादेव्या गङ्गानदी पूजिताऽस्ति। नदीमातृकायाम् अस्मिन् भारतवर्षे नदी देवीरूपेण अभ्यर्थिता। मातृरूपेण परिकल्प्य नद्यैः अञ्जलिसमर्पणम् भारतीयानां रीतिः संस्कृतिश्चेति। अत्र गङ्गानद्यै सीतादेव्याः भक्तिभावं प्रदर्शयति नाट्यकारः। यद्दृश्यते सीतावचने – "भगवति भागीरथि! यद्यहं सुखेन गर्भमभिनिर्वर्तयामि तदा तव दिने दिने सुष्ठु ग्रथितया कुन्दमालयोपहारं करिष्यामि।"[18]

सुष्ठुतया गर्भनिर्वर्तनादनन्तं सीतया विविधधार्मिकानुष्ठानस्य वर्णनं दृश्यते नाटकस्य तृतीयाङ्के। यत्र सीतादेवी स्वयमुच्यते – "निर्वर्तितं सवनम्, उपासिता सन्ध्या, हुतो हुतवहः, अवगाहिता भगवती भागीरथी, भगवतीं भागीरथीमुद्दिश्य मम प्रतिपन्ना स्वहस्तग्रथिता कुन्दमाला समर्पिता।"[19] गङ्गातटस्य सन्निकटे लक्ष्मणः सीतादेवीं कथयति, गङ्गायाः अनिलः भवत्याः समीपे सम्मानज्ञापनार्थं अत्रापि आगच्छति –

"आदाय पङ्कजवनात्मकरन्दगन्धान्
कर्षन्नितान्तमधुरान् कलहंसनादान्।
शीतास्तरङ्गकणिका विकिरन्नुपैति
गङ्गानिलस्तव सभाजनकाङ्क्षयेव।।"[20]

नारीणां प्रति सम्मानज्ञापनं दिङ्नागेन अत्र प्रदर्शितम्। पवनोऽपि नारीसीतादेवीं सम्मानं प्रदर्शयति, एतदपि भारतीयसंस्कृतेः प्रतिच्छविः। भारतीयसंस्कृतेः एषा धारा मनुसंहितायामपि वर्तते –

"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः
यत्र तास्तु नपूज्यन्ते सर्वास्तत्राफलाः क्रियाः।।"[21]

अत्र नाट्यकारेण वनाञ्चलं, देवी इति मर्यादया भूषितम्। वनाञ्चलं प्रति सीतायाः अभ्यर्थनं सम्माननां च सूच्यते। यथा वनदेव्याः मायावत्याः सम्बोधिता कथा सीतावचने – सखि! यदाहं महाराजशासनेन वनप्रवासे चित्रकूटं परित्यज्य दक्षिणापथं प्रस्थिता तदा चिरनिवास समुत्पन्नसखीस्नेहया चिन्ताकुलया वनदेवतया मायावत्या स्मरणनिमित्तं चन्द्रधवलं वासितसुगन्धमात्मनो दिव्यमुत्तरीयकं मम प्रणीतम्। तदायंपुत्रस्य ममापि हस्तेऽत्यन्त-सणीभूतं चिरदुःखसहायमित्यत्रात्मना सादरं धारितम्।[22]

**रामचन्द्रस्य चरित्रे प्रतिफलिता भारतीयसंस्कृतिः –**

नाटकस्य प्रथमेऽङ्के रामचन्द्रस्य राजकर्तव्यविषये परिचयः प्राप्यते सुष्ठुराज्य परिचालनं राज्ञः प्रधानं कर्तव्यम्। साधारण जनानां सुख-दुःखात्मवृत्तान्तम् लाभार्थं राजा सदा तत्परः वर्तते। एषः एव राज्ञः प्रधानधर्मः। तादृशे राजधर्माचारेण रामचन्द्रेण आत्मनिविष्टः कृतः। यथा सूच्यते सूत्रधारेण —

"लङ्केश्वरस्य भवने सुचिरं स्थितेति
रामेण लोकपरिवादभयाकुलेन।
निर्वासितां जनपदादपि गर्भगुर्वी
सीतां वनाय परिकर्षति लक्ष्मणोऽयम्।।"[23]

लक्ष्मणः चिन्तयामास, यः एषः राज्ञादेशः – "देव्याः किल सीतायाः रावणभवनसंस्थानाच्चारित्रं प्रति समुत्पन्नविमर्शानां पौराणामन्यादृशाः प्रलापाः प्रवर्तन्ते, तन्न शक्त्रोमि सीतामात्रस्य कृते शरच्चन्द्रनिर्मलस्येक्ष्वाकुकुलस्य कलङ्कमुत्पादयितुम्। सीतया चाहं गर्भिणीभावसुलभेन दोहदेन भागीरथीदर्शनं प्रार्थितः। तस्मात् त्वमनेन गङ्गागमनव्याजेन सुमन्त्राधिष्ठितं रथमारोप्य कस्मिंश्चिद्वनोद्देशे परित्यज्य निवर्तस्व इति।"[24]रामचन्द्रः सीतां परित्यक्तुम् अर्हति परन्तु राजकर्तव्यं त्यक्तुम् अक्षमः। रामचन्द्रस्य प्रजाभक्तिः अतुलनीया। प्रजाहिताय प्रजासुखाय एव रामचन्द्रेण सीतानिर्वासनरूपम् एतादृशं संकल्पं कृतम्। अस्मात् रामचन्द्रस्य राजधर्मपालनस्य परिचयं प्राप्यते।

केवलं लोकोपवादभयेन रामः सीतां परित्यजति, न अन्य कस्मादपि कारणात् इति वार्तां रामचन्द्रः लक्ष्मणमाध्यमेण प्रेषितवान्। यथा लक्ष्मणेन उक्तं सीतादेवीं प्रति-

"तुल्यान्वयेत्यनुगुणेति गुणोन्नतेति
दुःखे सुःखे च सुचिरं सहवासिनीति।
जानासि केवलमहं जनवादभीत्या
सीते! त्यजामि भवतीं न तु भावदोषात्।"[25]

लक्ष्मणेन, रामचन्द्रः अयं सन्देशोऽपि प्रेरितवान् यथा-

"त्वं देवि! चित्तनिहिता गृहदेवता मे
स्वप्नागता शयनमध्यसखी त्वमेव।
दारान्तराहरणनिःस्पृहमानसस्य
यागे तव प्रतिकृतिर्मम धर्मपत्नी।।"[26]

रामस्य जीवने सीतां विना अन्य कस्यापि स्त्रीजनस्य स्थानं नास्ति। तस्य ध्याने ज्ञाने सीतादेवी हि वर्तते। यद्यपि सीता वने निर्वासिता, तथापि यज्ञकार्ये सीतायाः प्रतिकृतिः रामचन्द्रस्य पार्श्वे प्रतिष्ठिता भविष्यति इति वाक्यमपि रामेण ब्रूयते। यतः यज्ञकर्म धर्मपत्न्या सह करणीयम् इति। आपस्तम्बधर्मसूत्रानुसारेण यद्यपि "न स्त्री जुहुयात्"[27]

तथापि यज्ञनिष्पादने यजमानस्य पार्श्वे धर्मपत्न्याः आवश्यकताऽस्ति इति अनुशासनं भारतीयसंस्कृतेः निदर्शनमेकम्। यदुच्यते शतपथब्राह्मणे – "पूर्वार्धो वै यज्ञस्यध्वर्युर्जघनार्धं पत्नी"।[28] अत्र पतिधर्मपालनेऽपि रामचन्द्रः आदर्शपुरुषचरित्ररूपेण उपस्थाप्यते। रामचन्द्रः पुरुषचरित्रस्य आदर्शदृष्टान्तस्वरूपः। अतः रामचन्द्रम् अनुकृत्य जीवनधर्मः पालनीयः इति शास्त्रे उपदिष्टोऽस्ति। यथा – "रामादिवत् वर्तितव्यं न तु रावणादिवत्"[29] इति।

सवनं, हवनम्, उदयकालिकसूर्योपासनं च नित्यं कर्म दिवसप्रारम्भे करणीयम् इति उपदेशवाक्यं अत्र नाटके दृश्यते। यथा उक्तम् रामचन्द्रेण विदूषकं –

"सवनमवसितं हुतं कृशानावुदयगतः समुपासितो विवस्वान्।
इति विधिमवसाय्य वासरादौ नियमधनानहमागतः प्रणन्तुम्।।"[30]

सवनं, हवनं, सूर्योपासनं इति एतादृशी वैदिकी परम्परा भारतीयकाव्ये शास्त्रे च एव दृश्यते, तत्र न कोऽपि सन्देहावसरः।

यज्ञकर्म, सामगानं इत्येतादृशायाः वैदिकपरम्परायाः संस्कृतयश्च आधारभूमिः अस्माकं भारतवर्षः। न केवलं वेदे अपि तु संस्कृतनाटके काव्ये सर्वत्रापि यज्ञस्य महिमान्वितं दृश्यं दृश्यते। तथैव कुन्दमालायां मुनीनामाश्रमे यज्ञधूमप्रसारः सामघोषश्च प्रतिपद्यते। यथा रामवचने-

"असौ तनुत्वादवधानदृश्या दिशः समाक्रामति धूमलेखा
आकृष्यमाणो मृदुनानिलेन श्रोत्रेषु सम्मूर्छति सामनादः"।।[31]

यज्ञं प्रति समधिकगौरवभावः अत्र दृश्यते। चतुर्थेऽङ्के रामचन्द्रवचने-

"दावाग्निं क्रतुहोमपावकधिया यूपास्थया पादपान्।
नव्यक्तं मुनिगीतसामगतया भक्त्या शकुन्तस्वनम्।
वन्यांस्तापसगौरवेण हरिणान् सम्भावयन्नैमिषे
सोऽहं यन्त्रणया कथं कथमपि न्यस्यामि पादौ भुवि।।"[32] इति

मुनिजनोपदेशमन्तरा नान्तरं ज्ञानं प्रकाशते। ज्ञानसम्पत्तिः सकलपुरुषार्थदात्री। चतुर्वर्गफलप्राप्तिः यथा भारतीयानां एका संस्कृतिः तथा च गुरोः समीपात् शिष्याणां सकलपुरुषार्थदायकं ज्ञानसम्पत्तेर्जनमपि भारतीयानामेकमैतिह्यम्। यदुच्यते विदूषकं प्रति रामचन्द्रेण - ननु मूलस्वयोगमूलसकलपुरुषार्थ सवेदिनी ज्ञाननिष्पत्तिः-

"ज्योतिः सदाभ्यन्तरमाप्तपादैरदीपितं नार्थगतं व्यनक्ति।
नालं हि तेजोऽप्यनलाभिधानं स्वकर्मणो मारुतमन्तरेण।।"[33]

कुशलवाभ्यां प्रणतेन रामेण-कष्टं व्रह्मशिरसा नतोऽस्मि इति विषादप्रकाशनम्। यदुच्यते रामभद्रेण कुशलवौ प्रति- 'न खलु भवद्भ्यां मर्यादालङ्घनमनुष्ठेयम्। कथं प्रणतावेव? कष्टं व्रह्मशिरसा नतोऽस्मि।'[34]किन्तु व्राह्मणेन क्षत्रियो न प्रणम्य इति व्यवस्थायाः अतिक्रमणं कृतं लवकुशाभ्याम्।। वाल्मीकिसमीपे वर्धितत्वात् तेषु बालकेषु व्राह्मणत्वसत्त्वात् रामचन्द्रेण लवकुशाभ्यां कृतं प्रणामं न ग्रहितुमिच्छसि। अतः रामचन्द्रः खेदम् अभिव्यनक्ति। नियमस्य उल्लङ्घनं न करणीयम् इति यथा भारतीयसंस्कृतेरेकम् ऐतिह्यं तथैव गुरुजनं प्रति शिष्टाचारप्रदर्शनमपि अस्माकं भारतीयसंस्कृतिरेव। यत् लक्ष्यते अस्मिन् नाटके रामभद्रवचने – "आर्यावतिदाक्षिण्यपेशलौ"[35] इति। तत्क्षणादेव रामचन्द्रोऽपि कुमारद्वयस्य गुरूणां कृते प्रणनाञ्जलिं व्याहृत्य शिष्टाचारपद्धतिं प्रतिपालयति, यस्य निदर्शनमत्र पञ्चमोऽङ्के यथा-

"अयं भवद्भयामतिसम्भ्रमेण मयि प्रयुक्तः शिरसा प्रणामः।
भवत्विदानीं मदनुज्ञयैव युष्मद्गुरूणां चरणोपहारः॥"[36]

कञ्चुकीवचने कुश-लव-लक्ष्मण सहितो रामः – "परिष्कृतस्त्रिभिर्वेदैरश्वमेध इवाध्वरः इत्युपमितः।"[37] उपमालंकारेण अत्र ऋक्-यजु-सामादिस्त्रिभिर्वेदैः परिष्कृतस्य अश्वमेधयज्ञस्य वेदपरकं वर्णनं भारतीयसंस्कृतेः ज्ञापकम्।

**लक्ष्मणचरित्रे प्रतिफलिता भारतीयसंस्कृतिः**

सीतारक्षार्थं लक्ष्मणेन गङ्गामुनि-वनदेवता-लोकपाल-शैलानां सम्प्रार्थनम् अत्र कुन्दमालानाटके परिदृश्यते। रामानुजेन लक्ष्मणेन सीतादेवी मातृरूपेण सम्मानिता जाता। मातुः सीतादेव्याः वने निर्वासनं लक्ष्मणेन तु असहनीयम्। तस्मात् कारणात्, सीतादेवीं गहनारण्ये रक्षणार्थं लक्ष्मणस्य इयम् प्रार्थना –

"भो- भोः लोकपालाः शृण्वन्तु भवन्तः –
"एषा वधूर्दशरथस्य महारथस्य
रामाह्वयस्य गृहिणी मधुसूदनस्य।
निर्वासिता पतिगृहात् विजने वनेऽस्मिन्
एकाकिनी वसति रक्षत रक्षतैनाम्।।
.........................................
.........................................
सख्यो नद्यः स्वामिनो लोकपालाः
मातर्गङ्गे! भ्रातरश्शैलराजाः।
भूयो भूयो याचते लक्ष्मणोऽयं
यत्नाद्रक्ष्या राजपुत्री गतोऽहम्।।"[38]

अनुजः लक्ष्मणेन अग्रजस्य रामचन्द्रस्यादेशः न कदापि अमान्यकृतः। रामादेशं शिरोधार्यं कृत्वा लक्ष्मणः सर्वदा स्वकर्तव्यपालनं कृतम्। एतत् तु लक्ष्मणस्य राजभक्तेः भ्रातृभक्तेः च परिचयं ददाति। सीतादेवीं परित्यज्य वनाद् आगमनकाले लक्ष्मणः विलापति-

"ज्येष्ठस्य भ्रातुरादेशादानीय विजने वने।
परित्यक्तासि देवि त्वं दोषमेकं क्षमस्व मे।।"[39]

तदा सीता कथयति– "ज्येष्ठवचनानुवर्ती त्वमिति परितोषकाले को दोष आशङ्क्यते।"[40]

अनुजरूपेण भ्रातृभक्तेः प्रजारूपेण च लक्ष्मणस्य राजभक्तेः एतादृशः परिचयः भारतीयसंस्कृतेः ऐतिह्यवाहकः।

**वाल्मीकिचरित्रे प्रतिफलिता भारतीयसंस्कृतिः**

मुनिवालकाः सन्ध्याभिषेकविषये गङ्गां गच्छन्ति। यथा उच्यते वाल्मीकिमुनिना-

"आकर्ण जह्नुतनयां समुपागतेभ्यः
सन्ध्याभिषेकविषये मुनिदारकेभ्यः।
एकाकिनीमशरणां रुदतीमरण्ये
गर्भातुरां स्त्रियमतित्वरयागतोऽस्मि।।"[41]

सायंकाले सन्ध्योपासना आचरणीया। सन्ध्यावन्दनादि नित्यकर्म। नित्यकर्माचरणे प्रत्यवायः दूरीभूतो भवति।[42]एतादृशी प्राचीनरीति अद्यापि प्रचलति। एषा अस्माकं भारतीयानां संस्कृतिः।

योगदृष्ट्या वाल्मीकिना सीतायाः वृत्तान्तं ज्ञातं यत् – 'जनापवादभीरुणा रामेण केवल परित्यक्ता, न तु हृदयेन। निरपराधा त्वमस्माभिरपरित्याज्यैव।'[43] योगदृष्ट्या परोक्षवृत्तान्तज्ञानम् अतीवधर्मवलेन एव भवितुं शक्यते। वाल्मीकितपोप्रभावेन दीर्घिकायां वर्तमानस्य स्त्रीजनस्य पुरुषनयनानामगोचरत्वसिद्धिः। यथा चतुर्थाङ्के वेदवतीवचने – "तदा भगवता वाल्मीकिना निध्याननिश्चलनयनेन मुहूर्तं निध्याय भणितम्- एतस्यां दीर्घिकायां वर्तमानः स्त्रीजनः पुरुषनयनानामगोचरो भविष्यति"[44]इति। अतः धर्मबलेन तपोबलेन च वाल्मीकिमुनिः त्रिकालदर्शी ऋषिः। पुंसवनादिसंस्काराणां करणीयता अत्र प्रतिपद्यते। यथा वाल्मीकिवचने –

"इक्ष्वाकूणाञ्च सर्वेषां क्रियाः पुंसवनादयः।
अस्माभिरेव पच्यन्ते मा शुचो गर्भमात्मनः।।"[45]

अर्थात् षोड़शसंस्काराः भारतीयसंस्कृतेः परिचायकाः। वेदे, धर्मशास्त्रे, मनुसंहितायां षोड़शसंस्काराणाम् आलोचना वर्तते। षोड़शसंस्काराणां प्रतिपालनं अवश्यमेव आचरणीयम्, इति सूचनां सीतां प्रति वाल्मीकिवचने स्पष्टरूपेण प्राप्यते।

सपरिवारेण गृहस्थजीवनातिवाहनं भारतीयसंस्कृतेर्निदर्शनम्। गार्हस्थधर्मात् विच्यूता सति सा सीतादेवी अरण्ये निर्वासिता जाता। गृहस्थस्य कृते सहसा अरण्ययापनं कष्टसाध्यम्। तस्मात् आश्रमपदं स्वपरिवाररूपेण परिकल्प्य तत्रैव उपवसनस्य उपदेशः वाल्मीकिमुनिना उपदिष्टः -

"कौशल्यापादशुश्रूषासौख्यं वृद्धासु लप्स्यसे।
पश्य सख्यो भगिन्यश्च तवैता मुनिकन्यकाः।।"[46]

अत्र वाल्मीकिवचने यौथपरिवारस्य एका प्राचीना धारणा सुस्पष्टा जाता, या भारतीयानां ऐतिह्यवाहका।

व्राह्मणेभ्यः स्वस्तिवचनं प्रकटितं भवति। 'अप्रतिहतवचनमहत्वा हि व्राह्मणजातिः'[47] इति व्राह्मणमहत्वप्रकाशनम्। किञ्च विभीषणस्य राक्षसत्वेऽपि व्राह्मणत्वात् विभीषण-सुग्रीव-हनुमत्प्रभृतयः इति द्वन्द्वेऽभ्यर्हिततया पूर्वप्रयोगः।

कार्यारम्भात् पूर्वं मङ्गलवचनेन अनुजम् आशीर्वादप्रदानस्य रीतिः कुशस्य राज्याभिषेकक्रियासम्पादनकाले वाल्मीकिचरित्रे दृश्यते। एषा रीतिः भारतीयानां संस्कृतिः परम्पराश्च। –

"मैथिलीतनयः श्रेष्ठः कुशो नाम महारथः।
अभिषिक्तोऽद्य साम्राज्ये मान्यतामस्य शासनम्॥
पुरन्दरस्य यत् स्वर्गे पाताले यच्च वासुकेः।
पृथिव्यां यच्च मान्धातुस्तदस्तु तव मङ्गलम्॥"[48]

वर्णाश्रमधर्माचरणे मूर्तस्वरूपस्य रामचन्द्रस्य परिचयः अत्र प्राप्यते। यथा उच्यते वने निर्वासितां सीतादेवीं प्रति वाल्मीकिमुनिना – "यदि त्वं वर्णाश्रमव्यवस्थाभूतेन महाराजेन निर्वासिताऽसि तत् स्वस्ति भवत्यै।"[49] अतः अत्र वर्णाश्रमव्यवस्थायाः महत्वं वर्णितमस्ति।

पृथिवी साक्षाद् दिव्यरूपधारिणी आविर्भावति। यथा वाल्मीकिमुनिना उच्यते-

"आकृष्टा मिथिलाधिराजतनयासत्येन पातालत-
स्तोयान्मज्जनलीलया तनुमिमां हित्वात्मनः स्थावराम्।
साक्षाल्लक्षितदिव्यमूर्तिमहिमायोगेन विश्वम्भरा
लोकं मध्यममम्बुराशिरशना देवी समारोहति।।"[50]

वाल्मीकिना तत्र उपस्थितेभ्यः जनेभ्यः, उत्थितापृथिवीदेव्यै अभ्यर्थननिमित्तं सन्दिश्यते। यथा –

"एतज्ज्योतिरुदेति नागभुवनात्संवासयन्तश्चिरा-
न्माल्यैः शीतलपद्यगन्धिसुभगाः पातालवाता दिशः।
एषाऽऽविर्भवति क्रमेण वसुधा राजन्! बधानाञ्जलिं
सौमित्रे! प्रणमादरात् कुशलवौ! पुष्पाञ्जलिः कीर्यताम्"[51]

तथा च, अत्र पृथिवी "भगवति" इति सम्बोधनेन अभ्यर्थिता – "नमो भगवत्यै विश्वम्भरायै।"[52] पृथिवीं प्रति अञ्जलिकरनिबद्धपूर्वकं सम्मानज्ञापनार्थं वाल्मीकिमुनेः एतादृशम् यद् उपदेशवाक्यमत्र श्रूयते तद् भारतीयानाम् ऐतिह्यम् इति।

**ऋषिकण्वस्य चरित्रे प्रतिफलिता भारतीयसंस्कृतिः**

नैमिष्ये शिवस्य नित्यनिवासः। यथा उच्यते मुनिना कण्वेन-

"अस्मिन् सन्निवसन्महेश्वरशिरस्ताराधिपज्योत्स्नया
मिश्रीभूय कवोष्णतामुपगतस्तिग्मो निदाघातपः।।"[53]

सततप्रवृत्तमहाध्वरतया तत्रेन्द्रस्य सन्निधानम्। वेदमन्त्रैरिन्द्राकर्षणम्। यथा कण्ववचने –

“एतस्मिन् वितताध्वरे प्रतिदिनं सान्निध्ययोगादधरे-
स्त्यक्त्वानन्दनचन्दनावनिरुहानालानतां प्रापिताः।
बिभ्रत्युच्चनिवेशितेन नयनेनालोकनीया अमी
मत्तैरावणकण्ठरज्जुवलयन्यासक्षतिं पादपाः”[54]

तदा रामेण उच्यते – सततप्रवृत्तमहाध्वरेण धर्मारण्येन नन्दनवनमपि विस्मारितो भगवान् पुरन्दरः।

“सचकितमवधाय कर्णमस्मिन् सुरपतिकर्षणमन्त्रनिःस्वनेषु।
विरचयति शची सदैव नूनं स्रजमवधूय वियोगवेणिबन्धम्।।”[55]

रामकण्वयोः संवादे मुनिनां सामगीतध्वनिमाहात्म्यवर्णनमपि अस्ति। यथा कण्ववचने –

“अस्मिन् कपोलमदपानसमाकुलानां
विघ्नं न जातु जनयन्ति मधुव्रतानाम्।
सामध्वनिश्रवणदत्तमनोऽवधान-
निष्पन्दमन्दमदवारणकर्णतालाः”[56]

तदा रामचन्द्रेण उक्तम् –

“मुनीनां सामगीतानि पुण्यानि मधुराणि च।
प्रवासिनामपि मनो हरन्ति किमु दन्तिनाम्।।”[57]

अग्निहोत्रसमयसन्निधानस्यवर्णना अत्र कण्ववचनात् श्रूयते – “अहमपि कुलपतेरग्नि-होत्रवेलां सन्निधानेन सम्भावयामि।”[58]

**ऋषिकाश्यपस्य चरित्रे प्रतिफलिता भारतीयसंस्कृतिः**

रामस्य यज्ञ-दीक्षानिमित्तं यज्ञस्य प्रस्तूतीकरणवृत्तान्तं तथा च मुनिकन्यकानां पर्णशालायां मङ्गलविधानार्थं पूजार्चनाविधिरूपम् आदेशवाक्यं काश्यपवचने उपस्थाप्यन्ते –

भो भो आश्रमवासिनो जनाः! शृण्वन्तु भवन्तः – इतो नातिदूरे महाक्रतुरश्वमेधः प्रवर्तते, सम्भृतानि यज्ञोपकरणानि, सन्निपतिताश्च नानादेशाश्रमवासिनो वसिष्ठात्रेयप्रभृतयो महामुनयः। केवलं भगवतो वाल्मीकेरागमनमुदीक्षमाणो नाद्यापि यज्ञदीक्षां प्रविशति महाराजः। आगतश्च वाल्मीकितपोवनवासिनामुपनिमन्त्रणार्थं रामदूतः। तस्मान्नैव परिलम्बितव्यम्।

तीर्थोदकानि समिधः परिपूर्णरूपा
दर्भाङ्कुरानविहतान् परिगृह्य सद्यः।
अग्रेभवन्तु मुनयो मुनिकन्यकाश्च
कुर्वन्तु मङ्गलबलीनुटजाङ्गणेषु॥[59]

**धरित्र्याः चरित्रे प्रतिफलिता भारतीयसंस्कृतिः**

सीतां प्रति पृथिवीदेव्याः वचने प्रणवपुरस्कृतमहाव्याहृतिनिर्देशः अस्ति। ओंकारस्योच्चारणादनन्तरं मुनिः स्थावरजङ्गमव्यप्तं समग्रभूतमण्डलं प्रणमति। भूमिदेवतारूपेण स्वस्य परिचयं ज्ञापयति स्वयमेव धरित्रीदेवी यथा –

“मामामनन्ति मुनयः प्रणवद्वितीयां
मत्तः प्रसूतिरखिलस्य चराचरस्य।
मय्येव सिद्ध्यति तपोऽवनिदेवतां त्वं
जानीहि जानकि! तवान्तिकमागतां माम्।।”[60]

दानव-सिद्ध-यक्ष-गन्धर्वकिन्नरलोकपालप्रभृतिदेव विशेषाणां संकीर्त्तनम्। सीतावचनं श्रवणार्थं मातुः धरित्र्याः सावधानवाणी –

"ऋषयो दानवाः सिद्धा यक्षगन्धर्वकिन्नराः।
मानवा लोकपालाश्च भवन्त्ववहिताः क्षणम्।।"[61]

मातृरूपेण देवीरूपेण च पृथिव्याः यः परिचयः अत्र प्राप्यते सः भारतीयसंस्कृतेः परम्परावाहकः।

पुनः, पृथिवी शेषमूर्ध्ना उह्यते –

"त्वं बिभर्षि जगत् कृत्स्नं शेषमूर्ध्ना त्वमुह्यसे।
काम्यानभिमतान् देवास्त्वामेव दुदुहुः पुरा।।"[62]

महावराहेण पृथिवी समुद्धृता –

"अभ्युद्धृतिश्च सहसा ममैवेयमनुष्ठिता।
पुरा महावराहेण त्वत्प्रकारेन साम्प्रतम्।।"[63]

इति या पौराणिककथा अत्र नाट्यकारेण उदाहृता सा भारतीयानां संस्कृतेः धारकः वाहकश्च।

**उपसंहारः**

स्वस्ति गोभ्यः।[64] वर्धतां गोकुलं च इति गोषुभक्तिप्रकाशनम्। दिङ्गनागो गङ्गां[65] प्रति आस्थावान्। रामायणगीतं[66] प्रति तस्य समादरभावः दृश्यते। वेदाभ्यास-यम-नियमादीनां पूतत्वं[67] उपस्थाप्यते। यज्ञप्रसङ्गेसविशेषमिन्द्रं वर्णयते। आदौ गणेश[68] पदपांशवोऽनेन प्रार्थिताः। अन्ते भरतवाक्ये[69] विविधा देवा अभिवन्दिताः। श्रीरामे अवतारश्चद्धया विष्णुबुद्धिरप्यस्य सुव्यक्तैव। एवं सर्वदेवान् प्रति प्रकटश्रद्धोऽप्येष इष्टदृष्ट्या शैव इति वक्तुं शक्यते। यतो हि प्रथमं विघ्नशमनाय हेरम्बं सम्प्राथ्यार्यं सविशेषं शम्भोर्जटासन्ततिं[70] स्तौति। किञ्च नैमिषप्रसङ्गे तत्र सततमहेश्वरवसतिं निबध्नन् तं प्रति स्वभक्तिभावं प्रथयति। अन्ते भरतवाक्येऽपि स्थाणुर्वेधा[71] इत्युपक्रम्य स्थाणोरेव प्राथम्यं प्रसाधयता तत्र स्वष्टभावः प्रकाशितः। तदेवं शिवे समधिकभक्तिमत्त्वमनेन स्वयं संसूचितम्।

एवं वेदमूला समग्रा भारतीयजीवनपद्धतिः प्रतिविम्बितेव दिङ्नागकाव्ये। अत एव उपर्यङ्कितकुन्दमालासङ्केतेन विशिष्यते कापि संशीतिर्दिङ्नागस्य वेदविहित-पुराण-प्रथितधर्मधुरीणत्वे, ब्राह्मणत्वे वा। सूक्ष्मेक्षिकया अवगम्यते यद् यज्ञादिधर्मानुष्ठानं प्रति नास्य केवलं शास्त्राभ्यासपाटवोपलब्धा दृष्टिः, प्रत्युत स्वयमनुष्ठितदैनन्दिनाऽऽचारपरिणतानुभूतिमयी निष्ठा। वेदेष्वपि सामप्राधान्यं बहुशस्तेनाविष्कृतम्। तेन तस्य सामवेदीयत्वं, तदुपवेद-गान्धर्ववेदं[72] प्रति समधिकप्रीतिमत्त्वं च स्वीक्रियते सुधीभिः। अतः भारतीयसंस्कृतेः एका भित्तिभूमिः दिङ्नागस्य इयं कुन्दमाला।

**अंतिम टिप्पणी:**

1. रघु. व. श्लो. 1/8, पृ. 7
2. श्रीमद्भगवद्गीता 9/27, पृ. 733
3. "दृश्यं तत्राभिनेयम्" सा.द. षष्ठ. परि. पृ. 239
4. भाव.प्र. अ. 4
5. "आश्चर्यमाश्चर्यम् ! एषा हि कुन्दमाला चरणसपर्यामिव कर्तुकामया समुद्रगामिन्या तरङ्गपरम्परया क्रमेण देवस्य पादान्तिकमुपहृता ।... को जानाति दुर्विदग्धः प्रजापतिः कथं कथं क्रीडतीति । गच्छत्वार्यः इदमेव गोमतीतीरं प्रतिस्रोतोऽनुसरावो यावदस्याः कुन्दमालायाः प्रभवमासादयावः।" कुन्द. मा. पृ.65-67.
6. कु.मा श्लो. 1/1
7. कु.मा श्लो. 1/2
8. तर्क. सं. पृ. 1.
9. कु.मा पृ. 11
10. कु.मा पृ. 24
11. तै. उ. म. 1/11,पृ. 312-313
12. कु. मा पृ. 26-27

13. कु. मा. श्लो 1/7
14. कु. मा. पृ. 14
15. कु.मा श्लो. 1/18
16. रघु. व. श्लो 14/69
17. कु.मा श्लो. 1/18
18. कु. मा. पृ. 41
19. कु. मा. पृ. 72
20. कु.मा. श्लो. 1/5
21. मनु.स्मृ. श्लो. 3/56
22. कु.मा. पृ. 92
23. कु.मा 1/3
24. कु. मा पृ. 9
25. कु.मा 1/12
26. कु.मा. श्लो.1/14
27. आपस्तम्बधर्मसूत्रम् 2:7:15:17
28. शतपथब्राह्मणः 1:9:2:2; 3:4:22; 5:2:1-10
29. का. प्र. प्रथमोल्लासः पृ. 15
30. कु.मा. श्लो.5/1
31. कु. मा. श्लो. 3/9
32. कु.मा. श्लो 4/4
33. कु.मा. श्लो 5/8
34. कु.मा. पृ. 150
35. कु.मा. पृ. 151
36. कु.मा. श्लो. 5/11
37. कु.मा. श्लो. 6/1
38. कु.मा. श्लो 1/21-26
39. कु.मा. श्लो 1/20
40. कु. मा. पृ. 30
41. कु.मा. श्लो. 1/27
42. "नित्यान्यकरणे प्रत्यवायसाधनानि सन्ध्यावन्दनादीनि।" वेदा. सार. पृ. 14.
43. कु.मा. पृ. 40
44. कु.मा. पृ. 89
45. कु.मा. श्लो 1/31
46. कु.मा. श्लो 1/32
47. कु.मा. पृ. 216
48. कु. मा. श्लो. 6/41, 6/42
49. कु.मा. पृ. 38
50. कु.मा. श्लो. 6/25
51. कु. मा. श्लो. 6/26
52. कु.मा. पृ. 204
53. कु.मा. श्लो. 4/6
54. कु.मा. श्लो. 4/7
55. कु.मा. श्लो. 4/8
56. कु.मा. श्लो. 4/9
57. कु.मा. श्लो. 4/10
58. कु. मा. पृ. 104
59. कु. मा. पृ. 56-57
60. कु.मा. श्ले. 6/31
61. कु.मा. श्लो. 6/33
62. कु.मा. श्लो. 6/27
63. कु.मा. श्लो. 6/32

64. कु.मा. पृ. 201
65. कु.मा. पृ. 7
66. हला यज्ञवेदि! रामायणसङ्गीतकनिमित्तं वाल्मीकितपोवनं सम्प्राप्तया... । कु. मा. पृ. 87
67. त-संयमपाविनो विस्मयोत्फुल्ललोचनः सर्व एव मुनिजन... महाराजेन भवितव्यमिति। कु. मा. पृ. 94
68. कु.मा. श्लो. 1/1
69. "स्थाणुर्वेधास्त्रिधामा मकरवसतयः पावको मातरिश्वा
पातालं भूर्भुवस्स्वश्चतुरुदधिसमाः साममन्त्राश्च वेदाः।
सम्यक्संसिद्धिविद्यापरिणततपसः पीठिनस्तापसाश्च
श्रेयांस्यस्मिन्नरेन्द्रे विदधतु सकलं वर्धतां गोकुलं च।।" कु.मा. श्लो. 6/45
70. कु.मा. श्लो. 1/2
71. "स्थाणुर्वेधास्त्रिधामा मकरवसतयः पावको मातरिश्वा
पातालं भूर्भुवस्स्वश्चतुरुदधिसमाः साममन्त्राश्च वेदाः।
सम्यक्संसिद्धिविद्यापरिणततपसः पीठिनस्तापसाश्च
श्रेयांस्यस्मिन्नरेन्द्रे विदधतु सकलं वर्धतां गोकुलं च।।" कु.मा. श्लो. 6/45
72. तौ किल भगवतो बाल्मीकिमहर्षेः शिष्यौ प्रवीणौ वीणाकलाविज्ञानेऽपूर्वं किलागमं धारयतः। एतौ किलैवं वदतः--'राजर्षेर्जनानां तपोधनबहुमानेनास्माकमिव भूस्थानमासनं प्रदानञ्चानुष्ठातव्यम्। यदा आवां... दुष्करविन्यासं महाकविसङ्ग्रथितमहापुरुषचरित्रबन्धं महार्थगम्भीरं केनाप्यश्रुतपूर्वमागमं गान्धर्ववेदसंवादि सरसं योगविरचितवर्णरमणीयकं वीणातन्त्रीरसितानुविद्धं गीतं गायावः, तदा विज्ञानविशेषप्रसन्नहृदयो राजा यद्वृत्तान्तमनुष्ठास्यति एष ज्ञातव्यः, इत्यस्माकं भगवतो वाल्मीकिमहर्षेरादेशः' इति। कु.मा. पृ. 141-142

## सन्दर्भग्रन्थसूची:


1. दाहालः, आचार्य लोकमणि, कुन्दमाला, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2008.
2. गीताप्रेस, गोरक्षपुर, श्रीमद्भगवद्गीता, 2020.
3. उपाध्याय, रामजी, संस्कृत निबन्धावली, लोकभारती प्रकाशन, 2004.
4. उपाध्याय,वलदेव, संस्कृत साहित्य का इतिहास, शारदानिकेतन्, वाराणसी, 2009.
5. शर्मा, उमाशंकर, संस्कृत साहित्य का इतिहास, चौखम्बा, भारतीय एकाडेमि, 2008.
6. आचार्य, दास, सीतानाथ, देवकुमार, उत्तररामचरितम्, संस्कृत पुस्तर भाण्डार, कलकाता 1998.
7. Krishnamachariar, M., History of Classical Sanskrit Literature, Motilal Banarasi Das Publishers, Private Limited, Delhi, 1937.
8. गीताप्रेस, गोरक्षपुर, उपनिषद, 2012.
9. दास, देवकुमार, संस्कृत साहित्येर इतिहास, सदेश, कलकाता, 2007.
10. आचार्य, लक्ष्मीप्रपण्य, पण्डित, स. आचार्य रामचन्द्र झा, रघुवंशम्, चौखम्भा, कृष्णदास एकाडेमी, वाराणसी, 2012.
11. शर्मा श्रीनिवास, काव्यप्रकाशः, भारतीय विद्या प्रकाशन, वाराणसी, 2013.
12. शास्त्री वन्द्योपाध्याय अध्यापक डः मानवेन्दु, मनुसंहिता, संस्कृत पुस्तक भाण्डार, 38 विधान सरणी, कलकाता, 2016.
13. पोद्दार, श्रीकानाइलाल, तर्कसंग्रहः, व्यानार्जी पावलिशार्स, कलिकाता, 1988.
14. भट्टाचार्य सुकुमारी, प्रवन्ध संग्रह, गाङ्चिल प्रकाशन, कलकाता 2012.
15. अनुवादक शास्त्री पाण्डेय साहित्याचार्य पण्डित रामनारायणदत्त, महाभारत (तृतीयखण्ड) उद्योगपर्व और भीष्मपर्व, गीताप्रेस, गोरखपुर, संवत्सरः. 2077.
16. गोस्वामी, श्रीविजनविहारी, यजुर्वेद-संहिता, हरफ प्रकाशनी, कलेज स्ट्रीट मार्केट, कलकाता, 2000.
17. Dutta, Kali kumar, Kundamālā of Diṅnāga, Sanskrit College, Calcutta, 1964.
18. मुखोपाध्याय, डः विमलाकान्त, साहित्यदर्पणः, संस्कृत पुस्तक भाण्डार, 38 विधान सरणी, कलकाता, 2008

19. श्रीवास्तव्य, डा. सन्तनारायण, वेदान्तसारः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2021.
20. तिवारी, डा. शशी, शारदातनय का भावप्रकाशन विवेचनात्मक अध्ययन, कैशिकी प्रकाशन, आगरा, 1984

**लेखक परिचय:** पिंकी दास, सहायक प्राध्यापिका, संस्कृत विभाग, पूर्णिदेवी चौधरी बालिका महाविद्यालय, बोलपुर, बीरभूम, पश्चिम बंगाल।